QP Code: CMB-02

# कर्नाटकसंस्कृतविश्वविद्यालयः

## सर्टिफिकेट्-परीक्षाः - २०२५

## महाभारतम्

### पत्रिका -२, विषयः - विदुरनीतिः

| | | |
|---|---|---|
| **Total No. of Questions: 27** | | **Total No. Of Printed Pages: 2** |
| **Date: 16.11.2025** | **Time: 2.30 A.M to 5.00 P.M** | **Max Marks: 80** |

I. **उचितम् उत्तरं चित्वा लिखत ।** Choose and write the correct answers. 15x2=30

१. अभिवादनशीलस्य कति गुणाः वर्धन्ते ?

क) दश ख) अष्ट ग) चत्वारः घ) पञ्च

२. मनुष्यः केन महत् (ब्रह्म) विन्दति ?

क) योगेन ख) बुद्ध्या ग) तपसा घ) गुरुशुश्रूषया

३. मनुष्येण कति गुणाः कदापि न हातव्याः ?

क) चत्वारः ख) षट् ग) अष्ट घ) दश

४. ज्ञातिभिः सह किं न करणीयम् ?

क) सम्भोजनम् ख) विरोधः ग) सम्प्रीतिः घ) संकथनम्

५. पुरुषे किं प्रधानम् ?

क) धनम् ख) शीलम् ग) आरोग्यम् घ) सुखम्

६. धर्मः केन रक्ष्यते ?

क) योगेन ख) तपसा ग) सत्येन घ) वृत्तेन

७. मनुष्येण कति अग्नयः प्रयत्नपूर्वकं परिचर्याः ?

क) त्रयः ख) पञ्च ग) सप्त घ) नव

८. भोजनेन वस्त्रेण किं परीक्षेत ?

क) विद्याम् ख) कुलम् ग) देशम् घ) बुद्धिम्

९. पाषाणेभ्यः किं प्राप्यते ?

क) अन्नम् ख) पुष्पम् ग) काञ्चनम् घ) जलम्

१०. नरः कीदृशं वचनं न वदेत् ?

क) उत्तमम् ख) मधुरम् ग) सुष्ठु घ) परुषम्

११. सज्जनः दत्त्वा किं न करोति ?

क) घृणाम् ख) अनुतापम् ग) ईर्ष्याम् घ) असूयाम्

१२. कति गुणाः मितभुक्तं भजते ?

क) त्रयः ख) चत्वारः ग) पञ्च घ) षट्

१३. कः अकीर्तिं हन्ति ?

क) विनयः ख) क्षमा ग) पराक्रमः घ) क्रोधः

१४. लोके का वशीकृतिः ?

क) प्रज्ञा ख) मेधा ग) क्षमा घ) शान्तिः

१५. विद्यायाः शत्रवः कति ?

क) त्रयः ख) चत्वारः ग) पञ्च घ) षट्

**II. पञ्चानां श्लोकानां भावार्थं संस्कृतभाषया / कन्नडभाषया / आङ्गलभाषया वा लिखत ।** 5x6=30

**Translate and explain any 5 shlokas in Sanskrit, Kannada, or English.**

१. यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे स्यात् तदाद्यं भूतिमिच्छता ॥

२. दुष्कुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्ह्रीमान् स कुलीनशतात् वरः ॥

३. पीठं दत्त्वा साधवेऽभ्यागताय आनीयापः परिनिर्णिज्य पादौ ।
सुखं पृष्ट्वा प्रतिवेदात्मसंस्थां ततो दद्यादन्नमवेक्ष्य धीरः ॥

४. अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥

५. नाक्रोशी स्यान्नावमानी परस्य मित्रद्रोही नोत नीचोपसेवी ।
न चाभिमानी न च हीनवृत्तो रूक्षां वाचं रुषतीं वर्जयीत ॥

६. रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥

**III. द्वयोः लघुटिप्पणीं लिखत । Write Short notes of any two.** 2x5=10

१. विद्यायाः शत्रवः ।
२. शान्तो हि पण्डितः ।
३. मूर्खः कः ?
४. प्रज्ञाबलं बलं श्रेष्ठम् ।

**IV. एकं प्रबन्धात्मकम् उत्तरं संस्कृतभाषया /कन्नडभाषया /आङ्गलभाषया वा लिखत ।** 1x10=10

**Explain briefly any one of the following.**

१. विदुरस्य नीतिवाक्यानां वैशिष्ट्यं निरूपयत ।
Describe the distinctive features of Vidura's ethical sayings.

२. विदुरस्य पात्रचित्रणं कुरुत । Describe the character of Vidura.

* * * * *